ORIGINAL RESEARCH PAPER | Arts

# ध्वनि-शब्द-स्फोटनिर्णयः
# DHVANI, SHABDA, SPOTA IN SASTRAS

KEY WORDS:

**Dr. C. Venkatesan**
Asst. Prof. in Sanskrit, Rajah's College of Sanskrit and Tamil Studies, Tiruvaiyaru, Thanjavur, Tamil Nadu - 613 204

इह लोके शब्देन व्यवहारः अत्यन्तं मुख्यतमो भवति। शब्दव्यवहाराभावे मनुष्यः मनसि विद्यमानं स्वेष्टं स्वानिष्टनिवृत्तिं वा बोधयितुं न पारयति। अर्थबोधाभावे परबोधाभावे, तेन किमपि कार्यं प्रचलेद्वा? कदाचिन्नैव । अतः परबोधनाय शब्दप्रयोगस्य अवसरः अनिवार्यः एव सर्वत्र। अत एव आचार्यदण्डी एवमभिप्रैति।

"इदमन्धतमः कृत्स्नं जायेत भुवनत्रम् ।
यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते" ॥

इति
अनेन ज्ञायते सर्वशास्त्रज्ञानां संमतिर्वर्तते शब्दप्रयोगे इति -

" घटः" – इति शब्दः अथवा पदमिति वा व्यवह्रियते। तस्मिन् कम्बुग्रीवादिमत्पदार्थनिरूपिता शक्तिः वर्तते इति लोकस्थितिः, परन्तु तस्मिन् तादृशशक्तेः प्रसक्तिः नास्ति । कुत इति चेदुच्यते, घटः – इत्यत्र घ् अ ट् अ विसर्गः इति पञ्चावयवाः सन्ति। तत्र एकैकस्यापि वर्णस्य उत्पत्तिस्थानं, बाह्यप्रयत्नः, आभ्यन्तरप्रयत्नश्च इति भिन्नतया त्रितयमपि स्वकीयं स्वकीयं वर्तते। तेन प्रथमवर्णस्य उत्पत्तिसमये अथवा अभिव्यक्तिसमये इतरेषां चतुर्णां वर्णानाम् उत्पत्तिः नास्ति स्थानादिभिन्नत्वात्। एकस्मिन् क्षणे स्थानमेकमाश्रित्यैव यत्नस्य कर्तुं शक्यत्वात्। एकस्थानाश्रितेन एकैनैव यत्नेन पञ्चापि वर्णाः उत्पादयितुं न प्रभवन्ति, पञ्चानामपि वर्णानां स्वोत्पत्तये अभिव्यक्तये वा भिन्न-भिन्न स्थानयत्नाश्रितत्वनियमात्। एतादृशस्थितिः न केवलं भिन्नभिन्नस्थानादिषु उत्पद्यमानपञ्चवर्णानमपि तु येषां समानानां वर्णानाम् उत्पत्तिस्थानादिसमं वर्तते, तत्रापि तुल्यस्थानवर्णाः तेऽपि युगपत् नोद्भवन्ति व्यज्यन्ते वा। तुल्यस्थानयत्नाः अपि शतम् अकाराः एकेन यत्नेन यदि नोद्भवन्ति, न व्यज्यन्ते वा, तर्हि भिन्नभिन्नस्थानयत्नकान् प्रति का वार्ता?

अनेन - 'घटः' इत्यत्र पञ्चवर्णानां स्थानादिकं भिन्नमेव भवति, पञ्चवर्णाः अपि क्रमशः एव उद्भवन्ति व्यज्यन्ते वा, प्रथमवर्ण-उत्पत्तौ द्वितीयादीनामभावः, द्वितीयवर्णस्य उत्पत्तौ प्रथमः नष्टः केचन नोत्पन्नाः, अन्त्यवर्णोत्पत्तौ सर्वेऽपि वर्णाः नष्टाः - इति स्थितिः ज्ञायते। संक्षिप्य पञ्चानामपि युगपदवस्था = सहावस्थितिः नास्ति। यत्र एकस्मिन् प्रदेशे काले च सहावस्थिततया बहवः अनुभूयन्ते, तत्रैव समूहः – समुदायः इति व्यवहारः क्रियते लोके। 'घटः' इत्यत्र घ् अ ट् अ विसर्गः इत्येतेषां सहावस्थित्यभावात् न समूहोऽयम्। अतः पदम् इति, शब्दः इति घटः इत्येतत् प्रति नैव संभति, घटः इति समूहस्य अभावात् । तस्मात् घटः इत्यनेन कम्बुग्रीवादिमदर्थबोधः न जायेत॥ परस्परविलक्षणवर्णेषु घटः इत्येतेषु पदं – शब्दः- शक्त्याश्रयः इत्यादि व्यवहारः न सङ्गच्छेत् चेत्, इति चेत्, कथं वा अर्थप्रसक्तिः? एतस्याः समस्यायाः दूरीकरणार्थं प्रकारान्तरेण प्रत्येकं वर्णाः कम्बुग्रीवादिमदर्थबोधकाः इति स्वीकुर्मः। तथा सति एकैकस्यापि वर्णस्य पदादिसंज्ञाः सिध्येयुः । अस्मिन् पक्षे प्रथमेनैव घ् इत्यनेन अर्थबोधे निष्पन्ने, अन्ये वर्णाः व्यर्थाः स्युः। किञ्च सर्वेषां वर्णानां प्रातिपदिकत्वादिप्रसङ्गः अनिष्टश्च। अतः नैतत् युज्यते॥

तर्हि इदानीं घटः इत्यस्मात् कम्बुग्रीवादिमत्पदार्थबोधो न भवति इत्यङ्गीकुर्मो वा? इति चेत्, एतदपि न संभवति, सर्वानुभवविरोधात्। लोके घटः इत्यादिषु श्रोत्रश्रुतेषु ध्वनिषु सत्सु व्यत्पत्तिमतः समनन्तरमेव कम्बुग्रीवादिमत्पदार्थबोधो जायते इति सर्वानुभवसिद्धम्। श्रुत्वैव अर्थबोधो जायते किल! कुत्र तादृशशक्तिः वर्तते इति जिज्ञासा।

ते च घ् – इत्यादयः ध्वनयः पृथक् पृथक् न अर्थबोधं जनयन्ति, एवं संघीभूय अपि न। तथा सति ध्वनिश्रवणात् अनन्तरम् अर्थप्रकाशाय मध्ये कश्चन स्यादेव। सत्यम्। स एव मानसप्रत्यक्षविषयः।

घटः - इत्यत्र नानावर्णाः, भिन्न – भिन्नध्वनयः सन्ति। तेषु पूर्वमुक्तवत् सहावस्थित्यभावः दृश्यते। तथापि अस्माकं प्रतीतिः एवं जायते, एकं पदम् इति, एकः शब्दः इति, एकः शक्त्याश्रयः इति। सा प्रतीतिः कदापि न बाध्यते इत्यतः, सा प्रतीतिः मिथ्या भवितुं नार्हति। अतः अगतिकगत्या पदं – शब्दः – इत्यादि प्रयोगा एव इतरेभ्यः निवृत्य, पद – शब्दादि वाचकानां कस्यचित् वाच्यस्य सत्वे प्रमाणानि भवन्ति। स च आन्तरः कश्चित् मानसप्रत्यक्षविषयः स्वीक्रियते।

घटः इत्यत्र घ् अ ट् अ विसर्गः इति श्रवणानन्तरं क्रमेण कश्चन एकः अभिव्यज्यते। तेन अर्थो बुध्यते इति हेतोः, 'स्फुट' विकसने इति धातोः करणव्युत्पत्या स्फुटति येन स स्फोटः इति तस्य संज्ञा सिध्यति , हेतौ अर्थे स्फुटति यस्मात् इति व्युत्पत्यापि स्फोटः इति तस्य संज्ञा। नादाख्यैः ध्वनिभिः अभिव्यक्तात् शब्दात् यः अर्थबोधः जायते स एव स्फोटः इति सिद्धम्। अत्र 'अकर्तरि च कारके संज्ञायाम' इति सूत्रप्रमाणम्॥

यस्मात् अर्थविषयकज्ञानं स एव स्फोटः इत्युच्यते चेत्, चक्षुरादीन्यपि अर्थविषयकज्ञानकारणान्येव । तथा सति तेषामपि स्फोट इति संज्ञा स्यादिति चेत् तन्न। तन्निवृत्तये अन्या व्युत्पत्तिः स्विक्रियते। स्फुट्यते - ध्वनिभिः व्यज्यते इति स्फोटः इति कर्मणि घञ्। ध्वनिभिः अभिव्यक्तः सन्नेव अयम् आन्तरः पदार्थः अर्थविषयकज्ञानं प्रति करणं हेतुर्वा भवति इति हेतोः- अस्य स्फोट इति अन्वर्थसंज्ञा। एवंरीत्या स्फुट धातोः अभिव्यक्तिः, बोधविषयीभवनम् इति अर्थद्वयाश्रयेण क्रमशः, तत्र तत्र प्रत्ययार्थस्य कर्मत्वेन करणत्वेन च अन्वयस्वीकारेण च अयमर्थः साधितः ।

अयमेव स्फोटः वस्तुतः – शब्दः- पदं – शक्त्याश्रयः एवमादिभिश्च व्यवह्रियते। स्फोटस्यैव शब्दः इति मुख्या संज्ञा इति महाभाष्ये दृश्यते। तत्र "अथ गौः इत्यत्र कः शब्दः" इति प्रश्ने - 'येन उच्चारितेन सास्ना-लांगूल-ककुद-खुर-विषाणिनां संप्रत्ययो भवति स शब्दः' इति। उच्चारितः नाम तादृशध्वनिभिः अभिव्यक्तः स्फोटः। एवञ्च स्फोटः एव शब्दः इति भाष्यकृदाश्रयः। ननु लोके ध्वनिः शब्द इति व्यवहारः क्रियते किल- इति पृष्टे गौणेन सोऽपि शब्द इत्युच्यते - इति तस्योत्तरम् । "अथवा प्रतीतपदार्थकः लोके ध्वनिः शब्दः इत्युच्यते। तद्यथा – शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवम् उच्यते। तस्मात् ध्वनिः शब्दः" इति। ध्वनेरपि शब्दत्वप्रतिपादकमिदं द्वितीयं भाष्यं, प्रथमभाष्यं स्फोटस्यैव शब्दत्वसमर्थकमिति सिध्यति। एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः इति ज्ञायते।

ननु स्फोटः नित्यः इत्युच्यते। तर्हि तस्मात् अविलम्बेन अर्थबोधः स्यात् – इति प्रश्ने नादाख्यैः ध्वनिभिः अभिव्यक्तस्सन्नेव स स्फोटः अर्थबोधं जनयति।

ध्वनयश्च संघीभूय स्फोटम् अभिव्यञ्जयन्ति उत पृथक् भूय इति प्रश्ने – वैयाकरणैः ध्वनीनां संघाभावस्य निश्चितत्वं वर्तते। अतः ध्वनयः पृथक्- पृथक् स्फोटं व्यञ्जयन्ति इत्यपि वक्तुं न शक्यते। यतो हि प्रथमध्वनिना एव स्फोटस्य व्यक्तत्वात्, स्फोटव्यक्तये द्वितीयादि ध्वनिनिष्पत्तिः व्यर्था स्यात्। ध्वनीनामेव वाचकत्वम् – इति पक्षे वैयाकरणैः ये दोषाः निर्दिष्टाः, ते सर्वेऽपि अस्मिन् स्फोटाभिव्यक्तिपक्षेऽपि भवन्ति।

ध्वनयः संघीभूय स्फोटं न अभिव्यञ्जयन्ति संघत्वाभावात्। पृथक् पृथक् व्यञ्जयन्ति। पूर्वादि क्रमेण ध्वनयः यथासंभवम् – अस्फुटं – स्फुटं – स्फुटतरं –स्फुटतमम् इत्येवं क्रमेणैव स्फोटम् अभिव्यञ्जयन्ति। इदानीं 'घटः' इत्यत्र श्रोत्रग्राह्यः घ् इति प्रथमध्वनिः अस्फुटम् अर्थं बोधयति, अन्ये यथाक्रमं स्फुटं – स्फुटतरं – स्फुटतमम् इति क्रमेण अर्थं बोधयन्ति इति स्वीकुर्मः। यदि स्फोटं न स्वीकुर्मः, एकैकः वर्णः एव साक्षात् अर्थबोधं जनयति इति स्वीकुर्मः तर्हि कूपः यूपः सूपः इत्यादौ प्रथमवर्णैः ककार-यकार-सकारैः अस्फुटम् अर्थे बोधिते, ततः परम् ऊपः इति आनुपूर्व्याः त्रिष्वपि समत्वात्, ऊपः इति उत्तरोत्तरवर्णैः इतरविलक्षणया एव स्फुटं – स्फुटतरं –स्फुटतमम् इत्यादि क्रमेण भिन्नाः एव अर्थाः न बोध्येयुः। स्फोटवादिपक्षे तु स्फोटस्य एकत्वात् निरवयत्वाच्च वर्णाः अस्फुटादिक्रमेण स्फोटं व्यञ्जयन्ति। इति न दोषः॥

ननु एकैकः ध्वनिः एकैकं स्फोटावयवं व्यञ्जयति। व्यक्तैः स्फोटावयवैः अवयविनि व्यक्ते सति, तस्मात् अर्थबोधः भवति इति किमङ्गीकर्तव्यमिति चेन्न, स्फोटस्य निरवयत्वात्।

बहुधा गौरवक्लेशम् असहमानाः प्रायः स्फोटं नाङ्गीकुर्वन्ति। परन्तु वैयाकरणैः – "कार्याणि वाक्यावयवाश्रितानि सत्यानि कर्तुं कृत एष यत्नः" - इति अङ्गीक्रियते।

अद्वैतिभिरपि स्फोटः नादृतः। तेषां ब्रह्मव्यतिरिक्तं किमपि न सत्यमिति मतम्। स्फोट एव ब्रह्म इति तु न युक्तं तस्य अचेतनस्य ब्रह्मत्वायोगात्। तस्यैव स्फोटस्य चैतन्यादिरूपत्वे च अङ्गीक्रियमाणे न अद्वैतमतात् विशेषः। सर्वथा च पारमार्थिकं प्रामाण्यं वेदानां मीमांसकैः यत् अभिमतम् – तदिदं स्फोटवाद - अङ्गीकारे न सिध्यति। इति वर्णात्मकः एव शब्दः नित्यः भवति मीमांसकानाम् ॥

चिद्रूपस्य आत्मनः हृदयं देशः। मध्यमा वाचः अपि स एव देशः। तत्रैव मध्यमानादेन स्फोटः व्यज्यते॥ परन्तु शैवानां नादो नाम अन्यः।

शैवे – नादो नामाभिधेयबुद्धिहेतुः, बिन्दोः प्रथमप्रसररूपः सूक्ष्मः, नादश्चिन्तया रहितत्वेन इति श्रीमत्कालोत्तराद्युक्तः। तत्रैव बिन्दुश्च तत्कार्यं मयूराण्डरसबिन्दुवदव्यपदेश्यः परामर्शज्ञानरूपः अक्षरबिन्दुः सूक्ष्मत्वेनोक्तः। अर्णश्च वर्णम् आकाशवायुप्रभवः श्रोत्रग्राह्यः स्थूलशब्दः।

तदुक्तम् - "स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तामयं भवेत्।
चिन्तया रहितं यत्तु तत्परं परिकीर्तितम्" ॥ इति

अन्यत्र "अव्यक्तत्वान्नादः सूक्ष्मः शब्दस्तु वाचकत्वेन।

वाक्यपदे प्रविभिन्नः पदार्थबुद्धेरसङ्करो यस्मात्" ॥

यस्मात् प्रतिपत्तृषु पदार्थबुध्यसङ्करः दृश्यते, तस्मात् प्रतिपुरुषं तेषु वाक्येषु पदेषु च वाचकत्वेन भिन्नरूपोऽयं नादः अव्यक्तत्वेन सूक्ष्मशब्दवाच्यः वाचकत्वेन स्थूलशब्दवाच्यः इत्युच्यते।

"सकलो बिन्दुरक्षरबिन्द्वात्मको नादश्च स्थूलध्वनिरूपः"।
"नादो बिन्दुः सकलौ सादाख्यं तत्त्वमाश्रितौ कथितौ" । इति॥

ध्वनिः - यद्यपि ध्वनिलक्षणं बहुत्र बहुभिः वर्णितं विद्यते, तथापि ध्वनिव्यतिरिक्तनादः कश्चन वर्तते इति सिद्धान्तशैवानामभिप्रायः। यतः स्थूलानां ध्वनीनाम् उत्पत्त्यपवर्गयोगित्वेन कारणान्तरापेक्षा वर्तते । ध्वनेः उद्भूतानां वर्णानां अभिधायकत्वसिद्ध्ये नादः अङ्गीक्रियते ।

शब्दः – शिवक्षुभितबिन्दुजन्य एव शब्दः । तस्य च परा पश्यन्ती मध्यमा वैखरीति चतस्रः वृत्तयः सन्ति। एवञ्च सर्वत्र व्यवहारावगमनाय इङ्गित-निमिषित-चेष्टितव्यापाराः सन्ति। तथापि सुलभ-स्पष्टप्रतिपत्तये शब्दानाम् उपयोगः मुख्यतमो भवति।

यतो हि -
"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" ॥

अत्र 'शब्दगुणकमाकाशम्' इत्यादि वैशेषिकमतरीत्या आकाशविशेषगुणः शब्दः न स्वीक्रियते भेर्यादौ जायमानत्वात्॥

स्फोटः – वैयाकरणमतोक्त वर्णव्यतिरिक्तः स्फोटः निराक्रियतेऽत्र । स्फोटो हि बहुभिः वर्णैः अभिव्यक्तः एव अर्थप्रतीतिहेतुः स्यात्।

लोके ध्वनिः = नादः श्रोत्रग्राह्यः, एवमेव शब्दोऽपि। स्फोट एव शब्दः इति वैयाकरणानां मतम्। परन्तु शैवानां ध्वनिभ्योऽपि अन्यः एकः नादः दृश्यते, स एव सर्वेषां मूलकारणभूतो भवति।

तदुक्तम् – "स महामायाजन्यो नादः परमार्थवाचको युक्तः" इति ॥

एवञ्च लोके श्रोत्रग्राह्यः ध्वनिः इत्युच्यते। स एव लोके नादः इत्युच्यते। स एव कदाचित् शब्दः इत्यपि उच्यते। वैयाकरणैः तु परमार्थतः अर्थवाचकत्वेन ध्वन्याख्यनादव्यङ्ग्यत्वेन यः विलक्षणः कश्चन स्फोटः इति अङ्गीकृतः, स एव परमार्थतः शब्दः इत्यङ्गीक्रियते। शैवागमे तु स्फोटः निराक्रियते। परन्तु लोकव्यवहारे ध्वनिः, शब्दः इत्यादि नामभिः यः उच्यते, तस्यापि परमकारणत्वेन, महामायाजन्यत्वेन च यः अङ्गीकृतः, स एव नादः इति प्रसिद्धः। तत्र महामायातः नादस्य प्रसरः, नादात् अक्षरबिन्दोः प्रसरः, अक्षरबिन्दोः स्थूलस्य वर्णस्य प्रसरः इति सृष्टिक्रमः। तत्र च नादः परः इति, अक्षरबिन्दुः सूक्ष्मः इति, वर्णः स्थूलः इति च यथासंभवं तत्र तत्र व्यपदिश्यते – इति विवेकः।

एवंरीत्या अस्मिन् प्रबन्धे ध्वनि-शब्द-स्फोट-नादानां यथाशक्ति विवेकः प्रदर्शितः।।
॥ इति शम्॥